श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीविष्णुविजयस्तोत्रम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

---

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीविष्णुविजयस्तोत्रम् ॥

देवा ऊचुः

नताः स्म विष्णुं जगदादिभूतं
सुरासुरेन्द्रं जगतां प्रपालकम्।
यन्नाभिपद्मात् किल पद्मयोनिः
बभूव तं वै शरणं गताः स्मः॥ १ ॥

नमो नमो मत्स्यवपुर्धराय
नमोऽस्तु ते कच्छपरूपधारिणे।
नमः प्रकुर्मश्च नृसिंहरूपिणे
तथा पुनर्वामनरूपिणे नमः॥ २ ॥

नमोऽस्तु ते क्षत्रविनाशनाय
रामाय रामाय दशास्यनाशिने।
प्रलम्बहन्त्रे शितिवाससे नमो
नमोऽस्तु बुद्धाय च दैत्यमोहिने॥ ३ ॥

म्लेच्छान्तकायापि च कल्किनाम्ने
नमः पुनः क्रोडवपुर्धराय।
जगद्धितार्थं च युगे युगे भवान्
बिभर्ति रूपं त्वसुराभवाय॥ ४ ॥

निषूदितोऽयं ह्यधुना किल त्वया
दैत्यो हिरण्याक्ष इति प्रगल्भः।
यश्चेन्द्रमुख्यान् किल लोकपालान्
संहेलया चैव तिरश्चकार॥ ५ ॥

स वै त्वया देव हितार्थमेव
निपातितो देववर प्रसीद।

त्वमस्य विश्वस्य विसर्गकर्ता
    ब्राह्मेण रूपेण च देवदेव॥ ६॥

पाता त्वमेवास्य युगे युगे च
    रूपाणि धत्से सुमनोहराणि।
त्वमेव कालाग्निहरश्च भूत्वा
    विश्वं क्षयं नेष्यसि चान्तकाले॥ ७॥

अतो भवानेव च विश्वकारणं
    न ते परं जीवमजीवमेव च।
यत्किञ्च भूतं च भविष्यरूपं
    प्रवर्तमानं च तवैव रूपम्॥ ८॥

सर्वं त्वमेवासि चराचराख्यं
    न भाति विश्वं त्वदृते च किञ्चित्।
अस्तीति नास्तीति च भेदनिष्ठं
    त्वय्येव भातं सदसत्स्वरूपम्॥ ९॥

ततो भवन्तं कतमोऽपि देव
    न ज्ञातुमर्हत्यविपक्वबुद्धिः।
ऋते भवत्पादपरायणं जनं
    तेनागताः स्मः शरणं शरण्यम्॥ १०॥

व्यास उवाच
ततो विष्णुः प्रसन्नात्मा उवाच त्रिदिवौकसः।
तुष्टोऽस्मि देवा भद्रं वो युष्मत्स्तोत्रेण साम्प्रतम्॥ ११॥

य इदं प्रपठेत् भक्त्या विजयस्तोत्रमादरात्।
न तस्य दुर्लभं देवाः त्रिषु लोकेषु किञ्चन॥ १२॥

गवां शतसहस्रस्य सम्यक् दत्तस्य यत्फलम्।
तत्फलं समवाप्नोति कीर्तनश्रवणान्नरः॥ १३॥

सर्वकामप्रदं नित्यं देवदेवस्य कीर्तनम्।
अतः परं महाज्ञानं न भूतं न भविष्यति॥ १४ ॥

॥ इति श्रीविष्णुविजयस्तोत्रं सम्पूर्णम् ॥